परमभिजित्स्वरसाम्नां विषुवानात्‌व्रात्यः स्वरसामानो दिवाजिद्वेति नवरात्रांशो भिजिदुच्यते। अश्वावर्षवादेननाममनि
र्वचनंविवस्तुः नामायागमधिकरोति। अभिजिन्नामायागो यं नित्यं वचनसमर्थनानुरूपगुणविधिमाह। देवा अभिजितारे

७६ नप्रयोगेनेमांस्त्रींल्लोकानभ्यजयन्तस्मात्स्तोमोऽयमभिजिन्नाम्नावक्ष्येत्तुरुदयो भवति। त्रयाणामावर्तनस्यानृ इत्यभ्यावृत्त। चतुर्णामु
दयोपस्यादिति चतुरुदयः। अभिजितः परस्तात्पाणांस्वरसाम्नां विषुवतस्तुर्थस्याच्चोदयं उत्र रोत्ररोपस्थाने नानुष्ठानं। त्र
याणां स्वरसाम्नामाप्तत्र। अत्रैराथर्वेणी पक्षान्तानुष्ठानं। त्र्ययत्री स्तरमाप्नश्चावृत्तानुपयंजी तिदिधास्यतिस्वपमेवा इस्त
तस्यैवार्थवादरूपेणोपदर्शनं कृतवान्। प्रासंगिकं विश्वजितोऽमनिर्वचनसमर्थ्यानानुरूपं विश्वजितो यागस्य कृत्स्नमा
रास्ये द गुणविधिमाह। देवा विश्वजिता इमान्सर्वान्सोऽदिशोऽजनयन्। तस्मात्स विश्वजित्यत्तुरावृत्त्युदयो भवति। चतुर्णा
मावर्तस्मिन्निति हिंदेणानां स्तोमनस्यावर्तनानां चतुरुदयोऽत्र। त्रिवृद्बहिष्पवमानं पंचदशं होतुराज्यं सप्तदशं मैत्रावरुणस्य
त्रैककाम्यावृत्तं पंचदशं ब्राह्मणाच्छंसिनः सप्तदशमच्छावाकस्यैकविंशो माध्यंदिनः पवमान इति द्वितीयाऽभ्यावृत्तः। सप्तदशं हो
तुः षष्ठमेकविंशं मैत्रावरुणस्य त्रिणवं ब्राह्मणाच्छंसिन इति तृतीयाऽभ्यावृत्तः। एकविंशमच्छावाकस्य त्रिणव आर्भ
वः पवमानस्त्रयस्त्रिंशमग्निष्टोमसामेति चतुर्थ्यावृत्तः। त्रिभिरावृत्त्यावृत्तः चत्वार उदया उत्तरोत्तराभिवृद्धिर्भवति।। चतुर्णा
वृत्ता त्रयाणामुदयो यस्मिन्निति च्युदयः। वक्ष्यति। छंदोगानां विश्वजित्त्रिवृद्बहिष्पवमानं पंचदशं होतुराज्यं सप्तदशं मैत्रावरुण राम.
स्यैकविंशं ब्राह्मणाच्छंसिन इत्येका चतुरावृत्ता। पंचदशमच्छावाकस्य सप्तदशो माध्यंदिनः। पवमानः एकविंशं होतुः पृष्ठं त्रिणवं ७६

मैत्रावरुणस्येति द्वितीया चतुरावृत्ता। सप्तदशं ब्राह्मणाच्छंसिनः एकविंशमच्छावाकस्य त्रिणव आर्भवस्त्रयस्त्रिंशमग्निष्टो
मसामेति। तस्यैवमर्थवादार्थप्रदर्शनं। अधुना निर्वचनमाह। देवा निष्क्रितं देवा अभिजिता यागेनाभ्यजयंस्तद्यदिदं वसंसं
जसं सक्रं यत्तदावश्यवा। अवशेष्यापन्नुनतार्थविवशावः। चुइति संभावनायां। ततो यदजितं पर्यशिष्यत्तद्विश्वजिताजयन्।
विश्वमजैष्मेति विश्वजिदुक्तो देवैरिति प्रासंगिकं विश्वजितो निर्वचनमुक्तं। पुनर्द्वयोः प्रशंसामाह। तौ वा एतावभिजिद्विश्व
पदभिजिद्विश्वजितो। इयं यस्मादग्निरिदं सर्वमभ्यजयदिंद्रो विश्वजिदिंद्रो हीदं सर्वं विश्वमजयदिति। कर्त्रीरीति पानिर्व
चनं। एवं तु करणे कर्तृत्वमुपचर्य निर्वचनं कृतं। अभ्यजयन्ननेनेत्यभिजिदिति। विश्वमजयन्ननेनेति विश्वजिदिति।।
सर्वा अभिजिदुभयसामा सर्वस्तोमो भवति। गुणाद्विधिमुमजयन्ननेनेति विश्वजिदिति। रथं उभे बृहद्रथंतरे साम
नीयस्य स उभयसामा आवृत्तावुभशब्दो न प्रयुज्यते किं तूभयशब्दस्यैव प्रयोगः। सर्वे त्रिवृदादयः षडपि स्तोमा यस्य स
सर्वस्तोमः। यद्यप्यन्येपि चतुर्विंशादयः स्तोमाः संति तथापि षड्भिः स्तोमैः सर्वस्तोम इति प्रसिद्धोऽत एव वक्ष्यति। एतानेव षट्स्तो
मानंद्वं समास्यन्निति परेषामनन्यवचनात्। उभयसामत्वे सत्येकस्य पृष्ठत्वमितरस्य संनिधानमात्रं तेन रथंतरपृष्ठो
बृहत्स्तोत्रे कल्प्यते। तेनोभयसाम्नि रथंतरपृष्ठे रथंतरपृष्ठेयः स्तोत्रास्तूर्द्धः प्रगाथः स्तमुवक्तप्रवदहतो यो मिंघ्वसतिबृहत्

११ ष्ठिरथंतरस्येति। निर्त्तोर्द्वसामप्रगाथायाद्युत्तरास्तु संस्थास्वेतद्योत्तस्तु शंसनमित्याचरणो। बृहद्रथंतरयोरेवानुशंसेदिति तस्माद्
कौषीतकिरिति महाकौषीतकीयब्राह्मणस्थो विशेष इह भवति। षडपि स्तोमास्त्रिवृद्बहिष्पवमानं पंचदशं होतुराज्यं
सप्तदशं मैत्रावरुणस्यैकस्वांस्या व्रह्म। द्वितीयस्यामेकविंशो माध्यंदिनः पवमानं पंचदशं होतुरात्तं सप्तदशं लराच्छं
सिनः। वृत्तुर्थ्यो त्रयस्त्रिंशमग्निष्टोमसामेति॥ तस्माद्युभयानि स्तोत्राणि शस्यंत इति॥ पूर्व सुत्रात्तगतो विशेषविधिरुक्तो
त्त उपजीवनेनायं तो त्तगतो विशेषविधिः। यस्माद्युभयसामा तस्माद्बार्हतराथंतराण्युभयानि स्तोत्राणि शस्यंते। तस्मा
तः पर्य्यप्रवो देवायाय इति। उभे बार्हतराथंतरे स्तोत्रियत्रिप्रवो देवायाग्नय इति स्तोत्रादित्वात्तासां बाहिष्टं तदग्न य इति
त्वस्तावत्तापरिछेदलाभात्। एते उभे तदाद्यमभिजिदाज्यं प्रव इति तस्य राथंतरं रूपं प्रकृतिस्थत्वात्। बृहद्देर्च विश्वाद्
सोऽग्नि। तद्वेत्ति तदा बृहदिति बार्हतं॥ उभौ माधुच्छंदसगार्त्समदौ प्रउगौ संप्रवपेदिति। उभौ प्रउगौ संयोजयेत्। संयो
जनमाह। वायव्यां पुरोरुचं शस्त्वायो उभे वायव्ये तत्त्वे ऐंद्रवायवीं पुरोरुचं शस्त्वायो उभे ऐंद्रवायवे तत्त्वे अथ पुरोरुच
मयो भेत्त्वे अथ पुरोरुच मयो भेतत्त्वे इति एवमिव संप्रवपेदिति। नाद्रियेतेति पूर्वोक्तं पक्षमनादृत्य पक्षांतरमाह। संप्रव रा.म.
यणं नाद्रियेत किंतु तांतां पुरोरुचं शस्त्वा तानि तानि वायव्यादीनि माधुच्छंदसान्येव पूर्वाणि त्वचानि करोति। गार्त्समदानि ११

१२
त्वान्युत्तराणि करोति। तदुवा अग्निरिति। तृतीयं पक्षमाह। तत्रोभौ किं संप्रवपेदेत न्नाद्रियेत। किंतु माधुच्छंदसे एव प्रउगे
सति गार्त्समदं वैश्वदेवमुपरिष्टान्माधुच्छंदसस्य वैश्वदेवस्य पर्य्याहरेदित्याद्युः। तदिति प्रस्तावार्य्यं उवेति। पक्षांतराणि वैश्वदे
वतत्त्वे स्यैव पूर्वं माधुच्छंदसस्तृचः पश्चाद्गार्त्समदः तृच इति संयोजनं नान्येषां तत्त्वानां संयोजनं॥ तदा अग्निरेतन्निरुक्तं बार्हतमि
ति। ननु माधुच्छंदस्य राथंतरं रूपमस्तु परंतु वैश्वदेवमस्य पर्य्याहरणे समयरूपाभावात्कथं बार्हतं रूपमिति शंकां परिहरति
वेति मिधितं तदेतद्वैश्वदेवमत्र विषयोनितन्क्रोन स्पष्टेन पदेन बार्हतं भवति॥२॥ विश्वे देवास आगतेति। वैश्वदेवत्त्वे स्यामतृग्निय
दहिरिति वर्त्तेनेतद्बार्हतं रूपं। उभयोरपि वह्वस्वद्बावितिधानो रूपत्वात्। अथ वैश्वदेवतत्त्वानंतरं माधुच्छंदसं सारस्वतं त
वेतस्यैवोत्तमया परिदध्यादिति तृतीयपक्षस्यैव समर्थनं॥ ऐकाहिकं प्रातःसवनं स्यादिति। चतुर्थः पक्षोऽयं। एकाहस्य प्रक
तेरग्निष्टोमस्येव प्रातःसवनं स्याच्चोभयानि स्तुत्राणि शस्यंत इति सा स्थितिरपि कृतिः। एकाहो वा अभिजिदिति। यद्यपि चतुर्थ
पक्षोपपत्रं पंसुत्रांपरं त्वनेनाभिजितोऽभिप्रेत्यात् प्रत्येकगोविश्वजिदिति। एकाहत्वस्योपदेशात्। अन्ये त्वेकाहो वा अभिजि
दित्यक्तिरपार्थिका गोराणि वा स्यात्। चतुर्थपक्षप्रशंसा तु प्रतिष्ठा वा एकाहः प्रतिष्ठित्या एवैतेनावर्तेत्व सिद्धेदतो एकाहो वा
अभिजिदिति विधिरुत्तरोऽर्थवादः॥ महाकौषीतकीयब्राह्मणे। अभिजिदभिजिगीषतां विश्वजिद्विश्वं जिगीषत इति॥

१८ आ त्वा रथं यथोतय इति। नित्य एकाहस्य प्रकृतेरग्निष्टोमस्यानां नो विसारस्तदीया प्रतिपन्न दीपोनुचरश्च मरुत्वतीयशस्त्रेनुष्टु
पः। तस्योक्तं आलस्तं। प्रकृतावुक्तं। आ त्वा रथं यथोतय इत्यनुष्टुभा मरुत्वतीये प्रतिपद्यत इत्यादि॥ जनिष्ठा उग्रः सहसे तुरा
येति। गौरिवीतिना ऋषिणा दृष्टं तदीयं जनिष्ठा उग्र इति सूक्तं सर्वशस्त्रापवादिंद्र पिब तुभ्यं सुतो मदायेत्येतस्मिन्वा ईजे वृहत्सा
मसंबंधिनि निष्केवल्ये सूक्ते निविदं दध्यादिति। सर्वस्य राथंतरत्वं प्रकृतिस्तत्वात्प्राप्तं॥ इंद्रस्य नु वीर्याणि प्रवोचमिति हिरण्यस्तूपेनार्षि
णा दृष्टं तदीयं सूक्तमिंद्रस्य नु वीर्याणि प्रवोचमिति राथंतरं प्रकृतिस्थं सर्वशस्त्रापवाद्यालकृतिरेव मा या पा परमेत्येतस्मिन्वा
ईजे वृहत्साम संबंधिनि निष्केवल्ये सूक्ते निविदं दध्यातिः॥ वाति॥ पफवृहदिति॥ उदिति प्रकृतं तरे। पचाभिजिति वृहत्पृष्ठमभवादिति दिवा
ईजे सूक्ते सर्वशस्त्रापवाद्धस्तमानेयोरेकाहिकयोऽप्रकृतिस्थयोर्निविदो दध्यादिति॥ एकसूक्ते निष्केवल्यमरुत्वतीयेस्याजा
मिति। प्रकृतांतरं। नो मयानि सूक्तानि मरुत्वतीये निष्केवल्ये च शस्येते। किं नु निष्केवल्यमरुत्वतीये शस्त्रे एकसूक्ते एकैकसूक्ते स्या
तामिति सास्थिति रवि कृतिः। के ते सूक्ते इत्यपेक्षायामाह। पिबा सोममभि यमुग्र तर्द इत्येकं। तमु ष्टुहि यो अभिभूत्योजा इति दि
तीयं सूक्तं। एते उभे अभिवती अभिशब्दवती तदभिजितो रूपं। सर्वस्य सूक्तस्य त्यां द्विपदामुत्सृजति शाखांतरात्॥ अथ नि
त्यमेवैकाहिकमिति। अपेति प्रकारांतरे। तृतीयसवनमेकाहिकं नित्यमेव स्यादिति सास्थितिरियमेव स्थितिः। अत्रावधार राम. १८

णां सर्वोक्थानां पक्षाणां तुल्यत्वार्थं। एकाहो वा अभिजिदिति सर्वविधानानुवादः। प्रतिष्ठा एकाहः प्रतिष्ठित्या एवेति प्रशंसा प्रकृतिस्थं दिवतो
भवद्य जमाना प्रतितिष्ठंत्येभवाति॥ २॥ स्वर्भानुर्ह्यासुर आदित्यं तमसा विध्यदिति। इतः परं सत्रे त्र्युष्ठानार्थं स्वरनुष्ठानार्थं स्वरसामानो
निरूप्यंते। स्वरसाम्नो निर्वचनं त्रेधावस्तृति। आद्यं निर्वचनं वक्तुमाख्यायिकामुपक्रमते। स्वर्भानुर्नाम्ना असुरसंबंधी असुर आ
दित्यं तमसा विध्यत्। अत्र प्रस्तोमो पजिघांसंत एतं सप्तदशस्तोमं अहं विषुवतः पुरस्तादुपायन्। अत्र यथाक्रम पक्षः सत्रेकुर्वीणा अप्र
वन्। तदाभिजिदनंतरं स्वर्भानुनास्तृष्टे उदयसमये उपपत्तस्तमसावरुद्धः। त्वदाऽत्रिभिः स्वरसामाख्य अह उपक्रांत तस्तान्नभावा अप
कमप एव निरस्तेत अकोनुष्ठित इत्यर्थः। इमाशांमक्तो यागानां समाहारस्त्र्यहः सप्तदशस्तोमा अस्य त्र्यहस्य सप्तदशस्तोमः। तस्मा
दित्यस्य पुरस्तादूर्ध्वमानं तमोपजघ्नुरुपरिष्टादुपक्रमेण। तत्तमस्तस्मादित्यस्य परस्तादसीदत्। विषुवदनंतरं पुनः स्वर्भानु
नादित्यः परस्तात्तमसावरुद्धः। ते अपतन्मेव अहं सप्तदशस्तोमं विषुवत उपरिष्टादुपायन्। तस्मादित्यस्य परस्तादूर्ध्वमाने
तमोपजघ्नुरुपरिष्टादुपक्रमेण। तत उपरिष्टा अहोनुष्ठित इत्यर्थः एवमाख्यायिकामुक्त्वा विधिमाह। तदिति प्रस्तावेवा
यं। ये सत्रिणा एवं विद्वांस एते सप्तदशस्तोमे अहं विषुवंतमुभयतः पुरस्तात्परस्ताच्चोपयंति। ते सत्रिणो यजमाना उभा
भ्यां लोकाभ्याममुष्मान्नमोस्मान्लोकाभ्यां पाप्मानमपघ्नते। तान्वै स्वरसामान इत्याचक्षत इति। ताचिहितान्यागान्त

७९ रसामान इति नामत्रा च क्रुते इति नामोपदेश उक्तः॥ एते ह्वा इति। अधुना नामनिर्वचनमाह। एते ह निष्पद्य इति प्रसिद्धो। एते दिवैरत्रयत्रा
दित्यं तमसः सकाशादपस्पृण्वत। स्पृ प्रीतिरक्षणयोः। णणे छांदसो लङ्युडभावश्च। आत्मनेपदं च। तत्स्मादपस्पृण्वत तस्मात्स्वर
सामानः। स्व स्पृ रक्षं सारयन्तः आदित्यमाक्रिन्वंत इति स्वरसामानः। अमगतो रिशुंतत्वो शादिको नि आत्मपदः। इत्येकं निर्वचनं।
द्वितीयं निर्वचनं स्वराख्यं सामये यांते स्वरसामान इति सूचयिष्यति। तृतीये निर्वचनं स्वरे स्वरयोनि स्पृष्टसामनी इदं यं तेरेये
यांते स्वरसामान इत्यपि सूचयिष्यति। अत एते रथंतर बृहत् स्पृष्टाः स्वरयोनयश्चेति त्रिधा व्यपदिश्यंते। अपेक्षारकाथिको क्रेनि
र्वचने मूलं संहिता मंत्रोस्तीत्याह॥ तदेतदृचाभ्युदितं। ३। यं वै स्वर्ण्यमिति। ऋग्वचेयोर्यं वेप्रसिद्धो। यं स्वर्ण्यं स्वर्भानुरसुरस्तमसा
विध्यत। अत्र यत्संस्वर्ण्य मन्वविंदन्। हि निश्चितमन्ये नाशक्नुवन्। इति समाप्तिवाची। स्वरसामानो ह्वा इति। एते स्वरसामानः स्वतं
त्रा नानुष्ठेयाः। किं तु विषुवंतमुभयत इत्युपदिश्यते। एते स्वरसामानो नाभिरिक्तकानाभ्यक्ताः। यथा मध्ये धुर्यो स्थानं परि
तो नाभि स्तथा मध्ये विषुवान्परितः स्वरसामान इति नाति रिक्तकाः। अत्र हेतुत्वा समर्थनं। कद्व तिमरुत्वतीयानीति। मरुत्व
तीयानि कद्वतिवसंते। निष्केवल्येषु प्रगाथाः कद्वतो वसंतो। तानि मरुत्वतीयानि प्रगाथाश्चेह स्वरसामसु भवंति को वै
प्रजापतिः। प्रजापतिः स्वरसामानः कद्वद्भिः संपादिताः। यथा प्रजापतिः प्रजाभ्यो नाभिस्तथा स्वरसामानो विषुवतो नाभिरि राम॰ ७९

ति तात्पर्यं॥ आनुष्टुभानि निविद्धानानिभवंतीति। पुनरपि विषुवत्संबंध एव समर्थ्यते। आनुष्टुभानि निविद्धानानिव संतेनाभ्यनु
भवंति। आपो वा अनुष्टुप्। अनुष्टोभंति इति पृथिवीमिति व्याख्यातं। आयः स्वरसामानः यतोनुष्टुप्छंदस्का निविद्धाना नामाश्र
याः। विषुवेत मनुष्टोभंतीति च। अपामनुष्टुप्त्वं स्वयमाह। हियतो द्विरिदं सर्वमनुस्तब्धं। हियतो मुमादित्यमुभयतश्चापः। अ
वस्ताद्धोपरिष्टाच्च। आदित्यमुभयतोस्त्वेसंहितामंत्रो मूलमस्तीत्याह। तदेतमुभयत आपः। अवस्ताद्धोपरिष्टाद्धोपरिष्टा
द्व। आदित्यमुभयतोस्त्वे संहितामंत्रो मूलमस्तीत्याह। तदेतदृचाभ्युदितं॥ ७॥ पारो वनेपरस्तादिति। सर्वा द्वैर्वे च पत्र तस्मा
त्तविषुवंतो बृष्टो मकाः स्वरसामानो नस्वतंत्रा इति तात्पर्यं॥ आयज्ञैर्देवमर्त्य इति। इतः परं प्रास्तेषु विशेषो विधीयंते। प्र
थमस्य स्वरसाम्न आज्यमाज्यशस्त्रे स्तक्रमेतत्। आयज्ञैर्देवमर्त्य इति। अस्य प्रशंसा। आवदाकारश्चद्वदतो राथंतरं।
आवदितिपडेह प्रथमस्याक्षरो रूपं तत्र प्रथमे क्रिरथंतरं दृष्टंते नावदिति राथंतरं रूपं। एवं प्रथमस्य स्वरसाम्नो रथंतरं दृष्टमि
ति सूचितं। बृहद्वदोहिमान वडति। द्वितीयस्य स्वरसाम्न आज्यशस्त्रे स्तक्रमेतत्। बृहद्वदोहि भानवड इति बृहदिति बार्हतं रू
पं। शाकृसाम्यात्। एवं द्वितीयस्य स्वरसाम्नो बृहत्स्पृष्टमिति सूचितं॥ अग्न ओजिष्ठमा भरेति। तृतीयस्य स्वरसाम्नो रथंतर
स्पृष्टमिति सूचितं। उभयसामा तृतीय इति द्विपिस्तके श्रुतमोपरिरूप्येति च शारवांतरं॥ माध्यंदिनः प्रथमस्य स्वरसाम्नः

८० प्रउगइति। प्रकृतिभूतेऽपि पुनर्विधीयते सारस्वतस्य तत्त्वस्य विकल्पाभावार्थः॥ गायत्रीमरुद्वितीयस्येति। प्रकृतिभूतं माक
छंदसबाधेन विधीयते। गायत्रीमरुः प्रउगो द्वितीयस्य स्वरसाम्नः॥ अग्नेरिहन्त्राप्रेयस्तृतीयस्येति। अयमपि प्रकृतिभूतमा
माधकछंदसबाधेन विधीयते। अग्नेरिहन्त्राप्रेयस्तृतीयस्येति। अयमपि प्रकृतिभूतमाकछंदसबाधेन विधीयते। अग्ने
रिहन्त्राप्रेयस्तृतीयस्य स्वरसाम्नः॥ तेषामुक्तं ब्राह्मणं॥ पार्ष्णिकेषु त्रिषु हः स्वप्रउगं सार्थपाप्रउगं द्रष्टव्यं॥ अत्रापवादमाहतृ
तीयानांप्रतिपदनुचराइति। अत्रापवादइति प्रकृतानां अन्यासां तेविकल्पाकांक्षायांशास्त्रसामर्थ्यस्यापं तदिति क्लृप्तिः॥ अनुवादोयं
प्रकृतिभूतानां विशेषविधानानां सत्वेपि प्रकृताः पदार्थाः अतिदेशतः प्रवर्तंते इत्यस्यार्थस्य ज्ञापनार्थः॥ अरूरुहोसोति। पथा
पार्ष्णिकेष्वाभिप्लविके हेवमरुत्वतीयानां प्रतिपदेनुचराब्राह्मणास्त्याम्प्रगाथा अत्रचापत्रास्तया सिन्त्रपि न्यदेन्वा
यत्राइत्यर्थः॥ तेषामुक्तं ब्राह्मणं॥ आत्वारथंयथोतयइत्यनुष्टुभामरुत्वतीयं प्रतिपद्यत इत्यादिना॥ कस्यवीरः कोअपश्य
दिंद्रमिति। प्रथमस्य स्वरसाम्न एतन्मरुत्वतीयं सूक्तं॥ क्वेति कद्वत्॥ कतस्थंजनमस्तीति कतस्थंजनाम्मुदितमरूरं तत्परस्मि
न्नस्तीति कद्वत्॥ कयाशुभासवयसः सनीलाइति। द्वितीयस्य स्वरसाम्न एतन्मरुत्वतीये सूक्तं॥ क्वेति कद्वता कतस्थंजन राम॰
मस्तीतिकतस्थंजनान्नमुदितंमरुत्वतीयशस्त्रसूक्तं॥ कयेत्यत्रप्रथममरूरं कत्वद्वत्सूक्तं॥ गायत्साम नमस्यं पयाविरितित्त ८०

तमरूरं तत्परस्मिन्नस्तीति कद्वत्॥ कयाशुभासवयसः सनीला इति॥ द्वितीयस्य स्वरसाम्न एत १

तीयस्य स्वरसाम्न एतन्मरुत्वतीयशस्त्रसूक्तं॥ त्वाकर्म्मीभनरस्मा इति कर्मेत्यत्र ककारेण कद्वत्॥ इमानिकद्वंतिमरुत्वतीयानि। एषां
प्रशंसा। कोवै प्रजापतिः प्रजापतिः स्वरसामानः ककारः सर्वत्रास्तितत प्रजापतिरूपाएते॥ वृजामयाअस्त्वेति। एतस्मिन्तृ
तीयतृतीयेस्तोत्रियेस्वरादिसामान्येके स्वद्वहम् अन्वायातयंति। इतः परंनिष्केवल्यप्रउगः। एके छंदोगाः स्वराणि प्रस्तावानि कु
र्वंति। तेषदितप्याकृपुरेतावेदस्तोत्रियानुरूपाविति। यज्ञायथेतिस्तोत्रियेद्वावनुष्टुभावेका बृहती। केचिच्छंदोगाः बृहती
माद्यां पठंति केचिन्मध्यां पठंति॥ केचिदंत्यां पठंति॥ ततस्तोत्रियानुसारिरोपचानुरूपेपि बृहती कार्या॥ अनुरूपोपदिंद्रादित्
मिहनेतिद्वेयाइंद्र मुञ्जड इतितृतीया। एतौस्तोत्रियानुरूपौ त्रिष्वपि स्वरसामसु॥ द्वितीयतृतीययोः स्वरसाम्नोः स्तोत्रियानुरूपौ
विकल्पौशाखांतरीयौकल्पसूत्रे संगृहीतौ॥ एषाधाय्येति॥ छंदोगानुरुद्धाप्राकृतीधाय्या॥ प्राकृतसामप्रगाथनिवृत्यर्थ
मनुवादोयं॥ कत्रत्वोअद्यसीनामिति। एषकद्वान्प्रगाथः॥ प्रथमे स्वरसाम्नि एषस्वरदृष्टे रथंतर बृहत् तद्दृष्टे स्वरयो
निपदेपिभवति॥ कद्वंतोनिष्केवल्येपुप्रगाथाइत्यविशेषेणोक्तत्वात्॥ बृहद्रथंतरदृष्टेपदेपि प्राकृतसामप्रगाथनिवृत्तिर्न
भवति॥ किंतुसामप्रगाथनिवृत्तिर्द्रष्टव्या॥ तस्य कद्वतः प्रगाथस्योक्तं ब्राह्मणं॥ कद्वंतो निष्केवल्येषु प्रगाथाः कोवै प्रजाप
तिरित्यादिसंस्थितिमेवोक्तं॥ पश्चात्स्वरथंतरस्ययोनिरिति। स्वरदृष्टपदेधाय्यानंतरं कद्वान्प्रगाथः तदनंतरं रथंतरस्ययोनि

८१ रभित्वाम्प्र नोनुम अत्विषाशस्तेश्च थमे स्वरसाम्नि॥ यमिंद्र दधिषेत्वमिति द्व चइति। यो निशंसनानंतरं यमिंद्र दधिषेत्वमिति
द्व चः शंसनीयः। नैकमातिजाम्पैनेदं सो बृहतीयज्ञायथ्याइति स्तोत्रियेत चेव र्तमानाद्बृहत्त्यैकाकिनीवशस्ता स्यदिति। द्व
चो बृहती छंदस्क इति बृहत्याएकपातिता निवर्तते। अस्यादिति ले टोरूपं। मा स्त्रिस्पर्धाः॥ इंद्र त्वम्भमिन्मघ वन्न न्नमिति। अयं
त्त चोविज्ञातवै ष्टुभंसवनधरसां। तस्योक्थ्या स्तरां। तानिवाएतानिविज्ञातवै ष्टुभानीत्यादि। यस्तेसाधिष्ठोवसइति। एतत्रिषे
वले सत्ते। आनुष्टुभं। आनुष्टुभानिविड्ढानानिभवंतीतियङ्ते तानि इमा नि। अयेतु पक्षांतरं दर्शयिष्यति। इंद्र क त्वष्मा
भरेत्वा वदाकारवत्। तज्ञाग्यं तरं रूपं॥ एवंसत्येतदंतं प्रथमेस्वरसाम्नि स्वरपृष्ठपक्षे॥ कद्रूत्वस्याकृतमिति। द्वितीये स्वरसा
म्नि कद्रूत्वस्याकृतमिति कद्वान्वगाथः सर्वेषु पक्षेषु। सामप्रगाथप्रवृत्ति निवृत्तीपूर्ववत्। तस्योक्थ्या स्तरां पूर्ववत्॥ ६॥
अथ बृहतोयोनिरिति। द्वितीये स्वरसाम्नि स्वरपृष्ठपक्षे धाय्यानंतरं कद्वान्वगाथस्तदनंतरं बृहतो योनिस्तामिद्धि त्वामहइ
त्येषा शंस्या॥ स्वरंतित्वासुतेनरइति द्व चइति। यो निशंसनानंतरं स्वरंतित्वासुतेनरइति द्व चः शंसनीयः। नैकपातिता।
यो नैदंसो बृहतीयज्ञायथ्या इति स्तोत्रियेत्त चेवर्तमानैकाकिनीशस्ताऽस्त। अभ्रधूर्षोदीरय्यमहेसुतानामिति। अयंतृचो राम.
विज्ञातवै ष्टुभंसवनधरसां। तस्योक्थ्यास्तरामिति व्याख्यातं। गोयंति त्वागायत्रिणइति। एतत्त्रिष्टुवलेश स्वेसत्तेमानु ८१

ष्टुभंनिविद्धानं। अयेतु पक्षांतरं दर्शयिष्यति। उद्धेदभि श्रुतमिवइति पादेउद्धन्नद्धार्हतं। द्वितीयस्याक्तोरूपत्वात्। एतदंतं द्विती
येस्वरसाम्नि स्वरपृष्ठपक्षे॥ इमाउत्वापुरूवसोइति। तृतीये स्वरसाम्नि इमाउत्वा पुरूवसोइति प्रगाथः। सर्वेषु पक्षेषु पा
वकवर्णाः शुचयो विपश्चितइति पादेकवर्णाइति तेन कद्वान्। साम प्रगाथ प्रवृत्तिनिवृत्तिनिवृत्ती पूर्ववत्। तस्योक्थ्या स्तरामि
ति व्याख्यातं॥ ७॥ अथ परस्थं तरस्य योनिरथ बृहत इति। तृतीये स्वरसाम्नि स्वरपृष्ठपक्षे धाय्यानंतरं कद्वान्प्रगाथस्तदनं
तरं रथं तरस्य योनिः शंस्या। तदनंतरं बृहतो योनिः शंस्या रथंतर पृष्ठपक्षे उभयसामत्वाद्बृहत एव योनिः शंस्येति इष्टव्यं
दानामग्गोनवाररा इति द्व चइति। यो निद्वयशंसनानंतरं दानानंतरं दानामग्गोनवाररा इति द्व चः शंसनीयः। नैकपातिता
ये। असोस्तोत्रियेप ज्ञायथ्या इति त्त चेवर्तमानाद्बृहतीएकाकिनीवशस्ता इदस्तृ॥ इदंत्यत्पात्रमिंद्रपानमिति। अयंतृ
चो विज्ञातवै ष्टुभंसवनधरसां तस्योक्थ्यास्तरामिति व्याख्यातं॥ इंद्रं विश्वा अवीवृधन्निति। एतत्त्रिष्टुवलेशस्त्रेसत्ते निवि
द्धानमानुष्टुभं। अयेपक्षांतरं दर्शयिष्यति। त्वामभिप्रणोनुमइति पादे अभिवत्नद्धापीतरं रूपं॥ एतदंतं तृतीये स्वरसा
म्नि स्वरपृष्ठपक्षे॥ तदाहुर्नानुष्टुप्सु निविदं दध्यादिति। सर्वत्वपर्वमानुष्टुभानिनिविद्धानान्युक्तानि। इदानीं पक्षांत
रं दर्शयति। तदाहुर्ब्रह्मवादिनः। अनुष्टुप्सु निविदं नदध्यात्। मध्ये दिनः स्वच्छंदसक्तत्त्विग्ज्ञानाक्रोह्यपति। सर्वत्रानुष्टुप्सु नि

८२ विद्विषाणं विहितं नास्ति नवीनं तत्रैव किं प्रमाणं मोहहेतुः। तस्मादानुष्टुभानि सर्वाणि शस्त्राणि कामस्येष्टस्योपाप्त्यै वेष्टुभेषु प स
माप्तेषु स्तोत्रेषु त्रिविदं दृष्टा। तत्पायपाय थे निविद्धी यतो सर्वत्रैत्रैष्टुभे ष्टुदृष्टा वैष्टुनि विद्धीयते॥ सा नित्रिष्टुप्पायथंधी
यमाना सर्वेषु लोकेषु सर्वेषु कामेषु यप्याय थे ये पायेभी ष्टास्तेषु कामे येनान्त्य जमानप्रभ्रं नीनद्धाति। नानित्रैष्टुभानि स्तो
त्रुषं ते। अर्वाय पयंदि ष्वुवारं तउभेतिप्रष्यमेहत्र। म्रावती त्पासस्ता रगासः कवसानमाछत्या व ति। म्राकार व ति। अत एव ए
यंतरे। स्र पादितउद्भुतम्प्रिव तम इति द्वितीयेहनि। उद्धतिउक्कब्द्वति। अत एव वार्हते द्वितीय पार्श्विकस्याह्नो व्रहत्पृष्ठत्वे
नवार्हं तत्वा त्साम्यं। संच त्वेजगमुर्गिरइंद्रस्तवीरितितत्रीयेहनि। जम्मुरित्तिगतं वत्तिगतमार्थवति। अत एवांत रूपेण त्रये तेहि
गतं कथ्यते। एवं विधि प्रतिषेधाभ्यां तत्व सर्वमानुष्टुभेषु निविदानमितिस्वर पृष्ठपदेष्टु विकल्पः। सर्वेषु पदेषु तत्वानि सर्वे
क्रान्नुद्ध त्यानुष्टुभानि चत्रैष्टुभानि चोभयानि सन्क्रान्त्येव शंसे त्रैष्टुभेषु निविद्धानमिति स्थितं। एवं सत्त क्रविद्रद्वावंस्म स्त
क्रेनिवित्तप्यमेस्तक्ते प्रगाथे चाहावइति स्तुचितं॥ यदि स्वराणि पृष्ठानि भवंति। त्रिष्टपि स्वरसामस्वयं विशेषः। यदि स्व
राणि पृष्ठानि भवंति तर्हि सामगाः पवमानेषु त्रिष्टप्सु हृद्वयं तरे एव कुर्वंति। यथ व्हहद्रथंतरे एव पृष्ठे स्यातां त्रिष्ट
पि स्वरसामसु तर्हि स्वराणि सामान्येव सामगाः पवमानेषु कुर्वंति व्हहद्रथंतरे स्वयोनिके स्वरयोनि शिष्टे वेति दोषपद्धो। स्व र राम· ८२

राणि च पृष्ठानि स्युरिति। कोपीन किरिया हस्मा अयमभीष्टतमः प्रकृतः। हि यस्मादेते स्वरसामानः। स्वरसामभिः पृष्ठैरर्याज
स्य स्तुतं ऐस्पद्यते। प्रशंसां तरमाह। वै निमूचे ये देवाः पृष्ठैर्वस्वर्गं लोकमस्पृद्धंदन्न द्यद्वस्वराणि पृष्ठानि भवंति तत्स्वर्गस्ये
व लोकस्य स्पृत्यै॥८॥ षष्ठस्य पलहस्य समृद्ध्यै स्पेति। निधेपल्पं समाप्यवैश्वदेवशस्त्रे विशेषमाह त्रिष्टुपि स्वरसाम स्वाप शेषु।
षष्ठस्य षलहस्य समल्हस्य संवधीयः सर्वश्राघस्वारत्नस्यवैश्वदेवांशशस्त्राणांप्याः प्रतिपदः स्ताः प्रतिपदो यथाक्रमं त्रिष्टु
स्वरसामसु भवंति। यान्तरस्य व्यहस्येति। षष्ठस्य षलहस्य समल्हस्य यउत्तर स्त्र्यहस्तस्य तृतीयसवनानि तानि सानुच
राणि वैश्वदेवानुचरप्रभृतीनि स्वरसामसु यथाक्रमं भवंति॥ तद्यानि तन्वेति। विशेषांतरमाह। जनेष्यास तितत्र तृतीयस
वने त्रिष्टुपि मध्यमे ष्टहः सा वैश्वदेवानि सन्क्रान्तिभवेति तानुद्ध त्यान्यानि प्राजापत्यान्यनिरुक्तानि बहुदेवतत्वाद्विशेषतो
देवतानिर्देष्टुं न शक्यते इत्यनिरुक्तान्यत एव प्राजापत्यानि तान्येव परोक्ष्वैश्वदेवानि सन्क्रान्त्यधीयंते। यद्वसमग्रेव ह्यादे
वानां करोतीति तत्र च स्पाप्य स्वारःशास्त्रां तरोक्तः। प्यानि सन्क्रान्त्यधीयंते तान्याह। प्रवं पांतंर खुमन्यवोंध संप्रत्यापर्व
त्या विम्हयेम पाकदि खान्दं पात्रं देवयन्ता मिति प्रतिनाभानेदिष्टो नामाचार्योमन्यते। पक्षांतरमाह। तद्देदेइति प्रस्तावे
व्यपदेशो रवतिति पक्ष्यांतरे। प्रत्युक्त वैश्वदेवान्येवाधीयेरन्। यन्नादित एव बहुनो देवता स्तानि प्रत्यक्षवैश्वदेवानि तान्येवा।

८५ वर्षीये रत्नानि स्तक्रान्यहाः। अग्निरिंद्रो वरुणो मित्रो अर्यमेति प्रथमेऽहनि स्वरसाम्नि वैश्वदेवं सूक्तं। प्रशंसामाह। घांस्कभि
त्वी तिकद्वत। प्रिये ममुं भंतेऽत्र नयो न सप्तपद इति मारुतं प्रकरणं तराया। देवा ह्रुवे प्य हस्त्र वसः स्वत्त पद इति द्वितीये स्वरसाम्नि
वैश्वदेवं सूक्तं। ज्योतिष्कृतो अश्वस्य प्रवेत सइत्रिपादे कद्वत। उपासा नक्ता वृहती सुपेशसेति तृतीये स्वरसाम्नि वैश्व
देवं सूक्तं। नक्तेति कद्वत् कौवै प्रजापतिः प्रजापतिः स्वरसामानः अयमुक्तो विशेषः स्वरष्टष्टपसे। प्रथमात्र्यहात् त्री
पसवनानीति वृहद्रथंतरष्टष्टानामिति। शाखांतरीयं कल्पसूत्रे संगृहीतं। तेऽग्निष्टोमा वेच्छया वा संतिष्ठेते इति। ते स्वरसा
मानो ग्निष्टोमा वा संतिष्ठेते द्वादशस्तोत्रेशस्त्राः संतिष्ठंते। उक्थ्या वा संतिष्ठेते त्रीणुक्थ्यान्यहो स्वीणि स्तोत्रशस्त्राणि परतो लम्बासं
तिष्ठंते वा। अत्र मतभेदमाह। अग्निष्टोमा इति पैंग्यमतं। अस्य प्रशंसा। ब्रह्मवर्चसिनो भवंति। यग्निष्टोमानुपयंति। नित्या संस्था
या आदरणात् ब्रह्मवर्चसित्वं उक्थ्यास्तु इति हस्माह कौषीतकिः। इति कौषीतकिमतं। अस्य प्रशंसा। वेनिश्चितं सयतक
तुः सम्प्रदायउक्थ्य। यज्ञक्रतुरिति पर्यायो रथियो गिकमात्रार्थत्वेन विशेषणविशेष्यभावेन प्रयोगः देवतासंगताय
जः किंयमारात्वात् क्रतुरिति। स स्वहं समर्धयेति। हि यतोऽस्य पंचदशस्तोत्राणि भवंति पंचदशशस्त्राणि तानि त्रिंशत्स्तुतशस्त्रा राम.
णि। स त्रिंशत्तत्त्वो वशस्त्रो विराज दशाक्षरं छंदोभिसंपद्यते। श्रीर्विराडन्नाद्यमिति। अयं त्वेनामिति श्रीः विशेषतो राजतइति वि ८५

राट्। अन्नाद्यं सर्वेष्वपुयंतीति विराजते वा तेनान्नाद्यं श्रीर्विराट्। तेनान्नाद्यस्याप्तिर्यो विराजमानस्योपास्ये विराजः संपत्तिर्भवतीति
प्रशंसा। द्विरभ्यासोऽध्यायसमाप्तौ मंगलत्वस्तुचनाय॥ ॥ इति श्रीमन्माधवमहात्मजविनायकभट्टकृते श्रीकौषीतकिब्रा
ह्मणभाष्ये चतुर्दशोऽध्यायः॥ ॥ आपस्तंबेनायं तेऽतिसत्रस्य मध्ये विषुवान्नामाहर्भवतीति निरूपयितुमाख्यायिकामुप
क्रमते। आप इत्यपामधिष्ठात्री देवता आपस्तंबेन त्यं ता अकुर्दतादिविशेषाक्रियावचना अपिधातवः किंपासामान्येन
कृणायाप्युपयुज्यंते। प्राकं पचतीति वत्। ता तपस्तप्त्वा तपसः फलं गर्भमदधत। ततोऽनंतरं षष्ठे मासि प्रैषं एष सर्वप्रसिद्ध आ
दित्यो जायत। अत्र येष समंमासा नो द्विधाय रावृत्ति दर्शनात् षष्ठे प्रैरोसतीति गम्यते। तस्मात्स्नात्रिरा षष्ठे मासि प्रैरो दिवाकीर्त्य
दिवाकीर्त्यपर्यायमेतंयज्ञमुपयंति। एवमाख्यायिकोपयोगे मुक्ता लोकदर्शितः ननु सूर्यस्य पूर्णाबष्ठो त्तरेणात्त्वे यागस्य किमा
यातमित्याशंक्यायं सूर्यसाम्येन सूर्यत्वं गोरामस्यपागस्येति दर्शयितुमाह। स आदित्यः परमासानुद्दतः इति षड्लावन्नावि
परीतान्दक्षिणान इति। तस्मात्स्त्रिराः षष्ठेवो अहोरात्रं आधितं सोयंति आरोह क्रमेणायंति षलावन्नान्विपरीतान वरोहक्रमेण
यंति। षट्कद्वयमध्ये एतद्दिवाकीर्त्ययाति। एवं सूर्यसाम्येन पूर्वोत्तरमासाद्वत्सरस्य सूर्यस्य त्रिसमानकालो स्वस्मिन्मा
नं सुक्रमिस्क्रं। अंतरे रोहहवास्तमिति। दिनार्ध इदमंतरेणोत्तव्ययं। यतोऽमध्ये सूर्यमंतरेण दिने वाशनाचाचाप। एतम रा

नायानामावरितं गुष्टत्वात्वारनमं तरेणविनैव तु नर्मस्तस्मात्पारतस्त्वर्य्यं पुनर्मस्त्वनीमवानुपारितः पारितत्वाद्वान्नातोपेवेदु
वतमहत्सपयं तिते शनायांपुनर्मिश्रं वजयंति॥ विषुवान्वाभिमात्तत्वं सतनुत्वलिन पञ्चस्यारद्वै पुवनं॥ तस्येतानि छंदो
रूपाणीति॥ तस्येतस्याह्नस्तंदोरूपाणि छंदःसु संहितामंवे भुरूपाणि॥ सूर्य्यवदिति केरूपं॥ मानुमदिति द्वितीयं॥ ज्योतिष्मदि
ति तृतीयं॥ रुक्मवदिति चतुर्थं॥ रुचितवदिति पंचमं॥ हर्य्यतवदिति षष्ठं॥ समुद्रादूर्मिर्मधुमाँ उदारदिति॥ इतः परं शस्त्राणि
एतदाज्यशस्त्रे सूक्तं॥ अस्य प्रशंसा॥ हिनिक्षिप्तमिव सूर्य्यः समुद्रादद्य उदेति॥ तत्तु सोपंयत इति युक्तं सूक्तं॥ इदं एकं सूर्य्यमेकं
जानेतिपादे सूर्य्यवत्त्वदेतस्याह्नोरूपं॥ सूक्तेऽस्मिन्नर्त्व्यां प्रशंसति॥ त्रिष्टुभः संशस्तः॥ सम्य कृत्वं स ने प्रयुक्ता एकविंशति रनु
ष्टुभो भवंति॥ समुद्रादेकादश ऋ सूक्तं जगत्यंतेन्त्रे ष्टुभां॥ त्रि प्रथमात्रिरुत्तमाः एवं सति द्वादश त्रिष्टुभः साद्धाः षोडशानुष्टु
भः॥ जगत्यात्रिरावृत्तया सार्द्धा चतस्र इत्येकविंशतिरनुष्टुभः संपद्यंते॥ एकविंशोवा एषय एष तपति॥ द्वादश वै मासाः पंच त्रींव
स्त्रय इमे लोका असावादित्य एकविंश इति श्रुतावादित्य एकविंशत्वदेनमादित्यमादित्यसमानं यजमानं सेनसूपेणासमर्द्धयति॥
त्रैष्टुभं प्रउगइति॥ त्रिष्टुप्छंदस्कं वैत्रैष्टुभोवत्समारोहः प्रउगः॥ एषयज्ञो द्धुमाध्यंदिविषुवान्दीक्षिमान्छंदसां मध्ये त्रिष्टुब्दी
प्तिमान्॥ तत्तस्मादेनं यजमानं स्वेन छंदसा समर्द्धयति॥ १॥ कुविदंग नमसा पिवृधा स इति॥ इदं वायव्यं तृचं॥ अत्र वासपत्नुषं सूर्य्य रो

रोति सूर्य्यवत्त्वदेतस्याह्नोरूपं॥ अतएवोत्तरं तृचमैंद्रवायवमिति॥ अस्मात्स्वादेवोत्तरं तृचमैंद्रवायवं तद्वयं यावत्तरस्तन्त्वो याव देवा
इति प्रतीकनिर्देशः स्वेन एतदैंद्रवायवं तृचमिति॥ यावत्तरस्तन्नत्सादीध्याना इतिपादेवन्दसेति सूर्य्य निर्देशः॥ इत्येतेन रूपेणा
स्मिन्यागे इत्सूक्तं॥ उ द्वांवत्तर्द्वरुणासुप्रतीकमिति॥ एतन्मैत्रावरुणं प्रउगस्तृचं॥ दिवयो रेति सूर्य्यस्तन्नवानि ति सूर्य्यवत्त्वा
देतस्याह्नोरूपं॥ आगोमता नासत्या रथेनेति॥ आश्विनं प्रउगस्तृचमेतत्॥ तस्याश्विनस्योर्ध्वंभानुं सविता देवो अश्रेदिति पादेन या
भानुमती सा तृतीयाकर्त्तव्या॥ संहितापाठेनपातृतीयात्वमुहूत्स्पविदे इत्यत्त्वाश्विना उषासइति या चतुर्थी सा भानुमती प्र
कर्त्तव्या॥ तदेतद्भानुमत्तमस्याह्नोरूपं॥ आनोदेवशवसायाहि शुष्मिन्निति॥ एतदैंद्रं प्रउगस्तृचं॥ तत्र शुष्मरा इति सूर्य्यस्य सा ता वि
ति सूर्य्यवत्त्वदेतस्याह्नोरूपं॥ प्रवेस्तुतस्तरचाद तसेति॥ एतद्वैश्वदेवं प्रउगस्तृचं॥ दिवरश्मिभिः ससृजे सूर्य्यो गा इति सूर्य्यवत्त्वा
तदेतस्याह्नोरूपं॥ उतस्या नः सरस्वती जुषाणेति॥ एतत्सारस्वतं प्रउगस्तृचं॥ द्वारा ह तस्य सुभगेव्यावरितिपादे द्वारा विति
सूर्य्यवसोकव्येतेड सेनेन रूपेणास्मिन्यागे युक्तं॥ एषवा उ सूर्य्यवानिति॥ सर्वस्य प्रउगस्य प्रशंसा॥ वेद इति निश्चये॥ एष सू
र्य्यवांस्त्रैष्टुभस्तृचकृतो वासिष्ठो वसिष्ठेन ऋषिणा दृष्टः प्रउगः प्रजापतिर्वै वसिष्ठः प्रजापतावेव तन्त्रेन प्रकारेण सर्वा
न्कामान्नश्नुवंति॥ २॥ तदाहुर्नित्रैष्टुभं प्रातःसवनं स्यादिति॥ समुद्रादूर्मिर्मधुमाँ उदारदित्याज्यं त्रैष्टुभमनुक्तं॥ प्रउगस्त्रैष्टुभर

८५ व्यक्तस्तेन प्रातःसवनं त्रैष्टुभमनुक्तान्तर्विंदतीप स्तांतरं वक्तुं। तदिति प्रस्ताविव्यं आकुर्पांक्तिकारूपयः। प्रातःसवनं त्रैष्टुभं नस्या
दिति। यत्तमुखं प्रातःसवनं त्रैष्टुभं सत्कृत्तछंदसकृत्विजो मोहयति। केषुपि यज्ञेषु प्रातःसवने दृष्टं ततः कथमत्रैष्टुभ
मिति मोहयाति। हात्त प्रभृत्तीन्वक्तृत्विजः। ऐकाहिकमेव स्यादिति। पूर्वं निर्दिष्टाभीरूपमाह। ऐकाहिकमेवातिदेशप्राप्तं स्यादि
ति। ज्योतिर्वा एकाहो दिवाकीर्त्यानां शेषः प्रकाशकत्वात्। ज्योतिरेव यथा एष तपत्याकिरणैः सर्वप्रकाशकः। ज्योतिषैवैका
हेन ज्योतिरादित्यतुल्यं समर्द्धयति॥ तस्य प्रवादे व्यायाययेत्वं हि देवा इति। पूर्वमेव कारकस्याग्नः पूर्वं एकः पर्वईर
पृक्तांतरस्य विष्णुवतो यज्ञस्य एते उभे सूक्ते तत्र स्वस्तुपमानं। ताः सूक्तद्वयस्य ऋचोयाः अनुष्टुभः स्ता। संख्या ताः एकविंशति
र्भवंति। पूर्वः सूक्तषभस्तानुष्टुभमिति सप्तानुष्टुभः। तं चैकादशानुष्टुभं शंकर्तव्यमिति दशानुष्टुभः शाकरीव्यतिरिक्ताः
त्रिः प्रथमा त्रिरुत्तमेति चतुरभिवृद्धौ विंशतिरनुष्टुभो भवंति। आपादनापेन्द्रा प्रशंसा। यदनुष्टुभ एव शंसंते तदेवं भवति
त्यर्थः। वृक्ततन्त्रमाशाकरी तस्यां त्रिः शस्तायां चतुर्विंशतिः सपादाः अनुष्टुभो भवंतीति द्रष्टव्यं॥ तासामेकविंशति संख्या
नामृचामुक्तं ब्राह्मणं एकविंशो वा एव य एष तपतीति॥ माधुछंदसः प्रउगः प्रातेरन्नेयते। अत्र सारस्वतेनैवेति कल्पसूत्र राम
स्वादिकल्पाश्रयत्वामि वेतियादिकाः। तस्योक्तं ब्राह्मणं। सर्वे सम्यक् सहस्रपेणान्ये प्रउगाः कल्पंत इति। [illegible] आतारंधयर ८५

योनय इति। प्रकृतिप्राप्तस्यानुवादोयं। पूर्वं व्याख्यातं॥ कयाशुभासवयसः सनीला इति। एतन्मरुत्वतीयेऽप्रिमाधुछंदसः प्र
शस्तं सूक्तं। शुभाशोभातनेभाः कांतिरुक्ता। इत्यनेन रूपेणास्मिन्यज्ञे युक्रमेतत्। त्वं सुमेषं महयास्वर्विदमिति। एतन्मरुत्वती
यं सूक्तं जागतं जगतीछंदस्कं। मध्ये स्मिन्धारयोर्दिव्यास्तर्यदशा इति पादेस्मिन्तः सूर्य्यवतात् तदेतत्सूर्यवत्त्वमेतस्या ऋचो रूपं॥
जनिष्ठा उग्रः सहसे तुरायेति। एतन्मरुत्वतीयेत्वेतीयं सूक्तमेतस्मिन्त्रैष्टुभे निविदं दध्यादिति। एवं सूक्ताविधानं नेयमिति त्रय
मेत्वाहावइति सूचयति। अपध्वांतमूर्णुहि पूर्द्धि चक्षुरिति सूर्यकर्मिप्रति भासतइत्यनेन रूपेणास्मिन्यज्ञे युक्रमेतत्॥ तावा
उभयस्य इति। तावेता अन्वविष्टुभ जगत्याउभय्यःशस्यंते। आदौस्तकेविष्टुभौ तेन च। मध्ये जगत्यः। वे निष्क्रये हेति प्रसिद्धौ। ए
षआदित्य विष्टुभ्जगत्योराहितत्वात् प्रतिष्ठितत्तपति। सोरीष्टस्तुपापेणानयोरपछंदसोर्दर्शनात्। तत्राभ्यां त्रिष्टुब्ज
गतीभ्यामेनमादित्यं प्रत्यत्तमामुवेति। बृहद्रे तस्याद्कः पृष्ठं स्यादिति। अतः निवेवल्येशस्त्रेपदृक्ताः प्रदर्श्यते। एतस्याह्नः
पृष्ठं बृहत्स्यादित्येके आहुः॥ हेतिसंमुग्धप्रसिद्धौ। अस्य प्रशंसा॥ वे निष्क्रये। वाईतत्यय एष तपत्याशंकस्य पमाह।
बृहद्रेतत्तपतीति वदंत इति। बृहत्तोयमहतस्तपनस्य संबंधी वाईतइति व्यक्तत्रिः। बृहतः प्रशंसा थं महादिवाकीर्त्य
पृष्ठं भवेदिति। अथो अत्र पृष्ठं वा एतद्यन्महादिवाकीर्त्यमित्याद्यदर्शनात्। अथैतेनैवप्रत्यक्षप्रधानेन पृष्ठेप बृहद्रथंत

८६ रोप्ररूतोदर्शनात्।तस्माद्बृहद्वैतस्याह्नः पृष्ठं स्यादिति॥यच्च सूर्य्यवति प्रगाये बृहत्कुर्य्युः सूर्य्यवतस्य प्रगाथानिति।अ
यमेकः पक्षः।सूर्य्यवति प्रगाथे साम गाय बृहत्कुर्य्युः।एवं सत्ययोनो बृहत्कृतं भवति।तदाहोतासूर्य्यवतः प्रगाथाच्छंसेता
तान्तृचं यं वदन्ति।न चेत्तत्र योनौ प्राप्नुवन्तद्वत्सूर्य्यमिति सूर्य्यवं तं स्तोत्रियं प्रगाथं इंद्रक्रतुं शतमित्यनुरूपः।यः सत्राहा विचर्ष
णिरितिसाम प्रगाथ इति।तथा बरामहां असि सूर्य्येति सूर्य्यवान्साम प्रगाथ इति सूर्य्यवत्त्वोक्तेर्विकल्पेनायं पक्षः साम प्रगा
थो भवति।एतस्येवाह्नो रूपेण सूर्य्यवंतो वत्समाराद्भिमे प्रगाथा प्रयुक्ताः॥इंद्रः किल श्रुत्या अस्य वेदेत्यस्य मुरवीयेति
अस्मिन्नह्नि इयमुख्यमुरवीया भवति।सहि जिष्णुः पथिकृत्सूर्यायेतिपादे सूर्य्यवती तदेतस्याह्नो रूपं॥महादिवाकीर्त्यमे
वैतस्याती।द्वितीयः पक्षोयं महादिवाकीर्त्यमेवैतस्य पृष्ठं बृहद्वास्यस्याह्नः पृष्ठं स्यादितिसाक्षिमितः।एतद्वै प्रत्यक्षं साममय म
हादिवाकीर्त्यं सूर्य्यवत्वादस्मिन्नहनि महादिवाकीर्त्यं प्रत्यक्षं साम।तथैतदयेसप्रातरनुवाकमेतदहर्दिवाकीर्त्यं भवती
ति वत्समारोन दिवाकीर्त्यं तत्सामेनापि प्रत्यक्षं साम।तत्तस्मादेनं यज्ञं स्वेन साम्ना समर्द्धयति॥तदेके त्रिष्टुप्सु कुर्वंतीति।
अस्मिन्नह्नि स्तोत्रियानुरूपाणां त्रयः पक्षाः।तत्रायमेके छंदोगास्त्रिष्टुप्सु कुर्वंतीत्येकः पक्षः।अस्मिन्नह्नि त्वं देवानामसि
तिस्तोत्रियो महादिवाकीर्त्यस्योत्तरे वोस्तूर्य्यो बृहद्दधीवीतित्तृतीयानुरूपस्येति सत्त्वे संगृहीतो स्तोत्रियानुरूपौ त्रिष्टुप्छंद रा॰म॰ ८६

स्कौ।त्रैष्टुभो वा एष य एष तपति।त्रिष्टुब्जगत्यो र्हवा एष आहितत्रादित्यः प्रतिष्ठितस्तपतीत्यर्थः।तदेनं यज्ञं स्वर्म्यवा स्वेन छंदसा
समर्द्धयति॥बृहतीषु स्यादिति।तत्रायमेके छंदोगा बृहतीषु स्यादित्याहुरिति द्वितीयः पक्षः।अस्मिन्नह्नि बरामहानुदुत्यदर्शतमि
ति।तौ स्तोत्रियानुरूपौ प्रगाथाविति सत्त्वे संगृहीतौ स्तोत्रियानुरूपौ बार्हतप्रगाथच्छंदस्कौ।बार्हतो वा एष य एष तपतीति बृहदेतत्तप
तीति वदंतः इत्यर्थः।तदेनं स्वेन छंदसा समर्द्धयति॥जगतीषु स्यादिति त्वेव स्थितमिति।अयमभीष्टतरस्तृतीयः पक्षः।तत्रायमम हा
दिवाकीर्त्यं जगतीषु स्यादिति स्थितमेव।जागतो वा एष य एष तपति।त्रिष्टुब्जगत्योर्ह वा इत्यर्थः।तदेनं सूर्य्यमर्कं चास्वेन छंदसा
समर्द्धयति॥४॥विभ्राड्बृहत्पिबतु सोम्यं मध्विति स्तोत्रियस्तृच इति॥अस्मिंस्तृतीयपक्षे स्तोत्रियानुरूपौ स्वयमप्याह।विभ्राड्बृहत्पि
बतु सोम्यं मध्विति तृचो जगतीछंदस्कः स्तोत्रियो भवति।विभ्राड्बृहज्जोमहि सूर्य्योदृश इतिपादे विवा विराड्बृहन्भ्राजिष्णान्ही
स्पर्द्धावान्।सूर्य्यवान्सूर्य्यशब्दवान्।तदेतस्याह्नो रूपं।त्रिष्टुबादितिविवाचित्यापिरूपमस्य तत्रं॥विसूर्य्येमध्ये अमुचद्रथं दिव इ
ति।जगतीछंदस्कौ विसूर्य्यो मध्य इति तृचो नुरूपो भवति।विवा सूर्य्यवानिति पुनः।जागतोयं।उ इति प्रबोधनार्थमव्ययं।वेनिश्च
ये।स्तोत्रियेण समानं छंदो भवतीति प्रशंसा॥विभ्राहात्वा सुमनसः सुचक्षस इति त्वेव स्थितं इति॥जगतीपक्षे एवानुरूपस्य
विकल्पोयं।अयं जगतीछंदस्क स्तृचोनुरूपो विकल्पेन भवति॥एवकारस्थितशब्दावयोगव्यावृत्यर्थौ।सो यम्यः सूर्य्यदेवत्यः।

८७ ज्योत्रीवाः प्रतिपरेण मस्तूर्य्येत्येतेनस्तूर्प्यस्वरूपेण संयुक्तः॥ बण्महां असि सूर्य्येति सूर्य्यवाचामप्रगायद इति। बृहत्पृष्ठ उपपरे महादिवा
कीर्त्यपृष्ठे पुक्तिष्ठपि सा मप्रगाथयो बण्महां असि सूर्य्येति वाईतप्रगाथयं दसकोभवति। सूर्य वतस्य प्रगाथ्यानितिश्चैव बृहत्पृष्ठपक्षे
उहस्पृष्ठपक्षे प्रयंयुक्तः। इहापि स्तूर्प्यवानिष्फलत्वात्। तदेतस्या क्लोरूपं॥ अथ बृहद्रथंतरयोर्योनिं शंसतीति। महादिवाकीर्त्यपृ
ष्ठ एव प्रस्तोत्रा महादिवाकीर्त्यपृष्ठे देवस्य सामप्रगाथ्यानंतरं बृहद्रथंतरयो ईयोरपि सामयोर्योनिं प्रत्येकं ह्यस्तु संबंधोऽस्कव
चनं योनिमिति। स्तीयां होता शंसति॥ इंद्रः किलस्य त्या अस्य वेदेत्कत्वमुखीयेति। महादिवाकीर्त्यपृष्ठपक्षे प्रकृत्वमुखीयेयं भव
ति। स हि जिस्तुः पथिकृतत्स्तूर्प्यायेता दिव्याख्यातं॥ शंनो भवचक्षसा शंनो अह्नेति त्वेवस्थितेति। महादिवाकीर्त्यपृष्ठपक्षे विकल्पे
न शंनो भव चक्षसा शंनो अह्नेत्य त्वमुखीया। अयमिष्टतरः पक्ष इत्येवकारस्थितश्च बृहद्रथोर्योर्योनी शीयं स्तूर्यदेवत्या। तत्स्तूर्प्य
स्य विराजो हि चित्रमित्येतेनस्तूर्प्यस्वरूपेण युक्ता॥ यएक इद्धव्यश्चर्षणीनामिति त्रैष्टुभमिति। महादिवाकीर्त्यपृष्ठपक्षेऽस्यैक
इद्धव्यश्चर्षणीनामित्येका दशर्चं त्रैष्टुभं विष्टुब्छंदस्कं सूक्तं मुखमुखीयानंतरं भवति। दिव्यानि दीपयोंतरिक्षे पादेऽस्यंतरिक्षे दि
व्यानि दीपयद् इति सूर्प्यरूपं तेन स्वरूपेण युक्तं॥ एवं नु वदीति। पूर्वोक्तं पक्षसार्धं यदि महादिवाकीर्त्यपृष्ठं भवति तदेवे तत्पक्षे रम·
हा एः॥ यच्चेवेबृहन्त्स्पृयोनो कुर्युरिति। पंचमः पक्षोऽयं। यदि बृहत्पृष्ठं स्तुयोनौ कुर्युः। बृहत आतांचे विस्तारं साम प्रगाथ्यांतं सा ८७
स्त्रारथंतरस्य योनिं शंसति। त्वामिद्धि हवामहे त्वं ह्येहि चेरव इति स्तोत्रियानुरूपौ। यद्द्याव इंद्र ते धाय्या। उभयं शृणवदिति वा षण्महां अ
सि सूर्य्येति वा साम प्रगाथ्यः। तदनंतरं रथंतरस्येति शंसति। न तु बृहतो योनिः शस्यते स्तोत्रिये शस्तत्वात्॥ इंद्रः किलस्य त्या अस्ये
ति। स्वयोनि पक्षेऽपीयं च मेउ त्वमुखीये यं भवति। स हि जिस्तुरित्याच वादो व्याख्यातः॥ पांचोर्नय इंद्राभिमूमार्य्य इति त्रैष्टुभमिति।
स्वयोनि बृहत्पृष्ठ पक्षे त्रैष्टुभं सूक्तं व योदशर्चं पांचो र्नय इंद्रेति भवति। इंद्रः कुत्साय स्तूर्प्यस्य सातावितिसूर्प्यवत्वेदेतदस्या क्लोरूपं।
न चेत्स्वयोनौ आयंतइव स्तूर्प्यमिति। अस्वयोनिपक्षेऽस्य घडक्तापथु सूर्प्यवतिप्रगाथ्ये बृहत्कुर्युः स्तूर्प्ययंतस्प्रप्रगाथ्यानिति।
तत्र स्तूर्प्यवतः प्रगाथान्दर्शयति। बृहत्स्वयोनौ नदेतप्रापंतइव स्तूर्प्यमितिप्रगाथ्यः स्तूर्प्यवां स्तोत्रियस्तेदेतस्या क्लोरूपं॥ यद्याव
इंद्र ते शतमित्यनुरूप इति। अस्वयोनि बृहत्पृष्ठपक्षे यद्याव इंद्र ते शतमितिप्रगाथोऽनुरूपः। न त्वा वज्रिन्सहस्रं सूर्प्या अनु
तिपादे सहस्रं सूर्प्या इति सूर्प्यवान्तदेतस्या क्लोरूपं॥ पः सत्राहा विचर्षणिरिति साम प्रगाथः। तत्र यस्य सूर्प्य इति सूर्प्यवां स्तदे
तस्या क्लोरूपं॥ बण्महां असि सूर्येत्यपि विकल्पतः कल्पसूत्रे आम्रिताः॥ अथ बृहद्रथंतरयोर्योनिं शंसति। अस्वयोनि बृह
त्पृष्ठपक्षे महादिवाकीर्त्यपक्षेऽवद्भयोर्बृहद्रथंतरयोर्योनिं शंसति। इंद्रः किलस्य त्या अस्य वेदेत्यत्वमुखीया तस्याउक्तं आस
रा मिति। अस्वयोनि बृहत्पृष्ठपक्षे विधिः पूर्वमेवोक्तः स्तत्र तु साम प्रगाथ्यानंतरं विधिरुक्तः। स एवात्रयोन्यनुशंसनानंतर्यार्थं पुनरु

८८ न्तः। अन्यथा संदेहः स्याद्योनिशंसनं वा पूर्वमुख्यमुखीयावाप्य इति। एवं विकल्पः स्यात्। अतो द्विरुक्तिरुपपन्ना॥ य एक इद्धव्यश्चर्ष
णीनामिति त्रैष्टुभमिति। अस्य योनिर्बृहत्पृष्ठपक्षे त्रैष्टुभं सूक्तं य एक इद्धव्यश्चर्षणीनामिति भवति। तस्योक्त आश्रयः। दिव्यानि
दीपयोऽन्तरिक्षे तेनेति॥ एवं नु यदि बृहत्पृष्ठे योनौ वा स्वे नौ वा कुर्युरिति। एवं पूर्वोक्ते पक्षे वैरूपे तयोर्योनौ कुर्युरित्यारभ्य तस्यानन्ते
स्वयोनाविति आरभ्य तत्पद्या कर्मे यदि बृहत्स्वयोनौ वा स्वयोनौ वा कुर्युरिति पक्षद्वयदिश्य यमिति पक्षसंहारः। अनुभयसामा
चेत्कुर्युरिति। अयं पञ्चमः पक्षः। यत्र कर्मे रथंतरबृहती सामनी माध्यंदिने पवमाने न कुर्युः पूर्वोक्तेषु पञ्चसु पक्षेषु महादिवाकी
र्त्यस्य पक्षत्रयमध्ये कंचन पक्षं कुर्युः। बृहत्पृष्ठस्य पक्षद्वयमध्ये कंचन पक्षं कुर्युः। परं तु माध्यंदिने पवमाने उभे सामनी न कुर्यु
रिति षष्ठे पक्षे उक्थमुखीयाप्य उक्थमुखीयाय ययर्थंतरसामानं बृहद्रथंतरयोर्योनी उद्धरेत्। योन्यनुशंसनं पक्षद्वयोक्तमस्ति तन्न कुर्यादि
ति विशेषः॥ तमु ष्टुहि यो अभिभूत्योजा इति त्रैष्टुभमिति। अस्मिन्नुक्ते बृहद्रथंतरयोनिपक्षे त्रैष्टुभं सूक्तं पञ्चदशर्चं तमु ष्टुहि
यो अभिभूत्योजा इति। एतं बृहद्धा सूक्त महादिवाकीर्त्ये वा गीर्भिर्वर्धदृषभं चर्षणीनामित्येतेन तृचषभं च तुकमिति सूर्यरू
पशावे त्रैष्टुभं सूक्तमेतत्पक्षे। एतत्त्रैष्टुभप्रभृति पंक्ती संपदिति वक्ष्यते। समानमुत्तरमिति। इतः परं यद्युच्यते तत्समानं बृह राम.
त्सपि पक्षे स्तु॥ अभि त्यं मेषं पुरुहूतमृग्मियमिति जागतमिति। त्रैष्टुभानंतरं जगती छंदस्कं पंचदशर्चमभि त्यं पुरुहूतमृग्मि ८८

यमिति सूक्तं भवति। आदित्सूर्यस्य दिव्यारोहयोः प्र इति सूर्यवत्। तदेतत्स्याप्रोक्तं रूपं। ताबा उभयस्य इति चैव इति निक्षेपे ता उभयपक्षि
ष्टुजगतः शस्यंते त्रिष्टुब्जगत्यो ऐवा एष आहितमादित्यः प्रतिष्ठित तस्मा त्रि देवं प्रतसूक्तस्य शंति। एषा संबंधात् स्यूमशंसीस
मते॥६॥ प्रते महे विदथे शंसिषं हरी इति। जागतानंतरं प्रते महे इति सूक्तं शंसेत्॥ अस्य शंसने विशेषमाह। तस्य नव ऋचः
शस्त्वा द्व्यमाहावपूर्वकं निविदं दधाति। आह्वयेति प्रकृतित्राह्वानुवादः। आविष्कृधि हरये सूर्यायेति सूर्यवत्तदेतस्याप्रोक्तं रूपं॥ स
वे हरेश्च तत्सोऽयं प्रेति। एकशतं निविष्ठेवल्यामिति वक्ष्यति। पूर्वी एकपंचाशदिति वक्ष्यति। इह पूर्वं त्रैष्टुभसूक्तविदेके निवि
दः वषिकारकर्णं वा शब्दवशिष्टास्तादर्शयति। सर्वे हरेः प्रते महे विदथे शंसिषं हरी इति त्रयोदशर्चस्य सूक्तस्य नवर्च उपयु
क्ताः शिष्टास्तत्सोऽयं प्रेति निविद उपरिष्टात्प्रोक्तिरितो। ता॥ आ सत्यो यातु मघवा ऋजीषीत्येकविंशतिरिति। तदनंतरं मासत्यो या
त्विति सूक्तमेकविंशत्यृचं भवति। महि ज्योतिः कुरुचुर्यद्वज्योरित्येतेन रूपे एगास्मिन्प्रज्ञे ष्टुक्तं। ताः पंचविंशतिरिति वैशचा
र्याय त्रयं दर्शयति॥ विश्वजिते धनजिते स्वर्जित इति प्रगाथस्य इति। तदनंतरं विश्वजिते धनजिते इति सूक्तं पलर्चं भवति।
विश्वजिते षड्ढि सूक्तमित्यनुक्रमणी। ततो जगत्य इति भिन्नं वाक्यं जगत्य इति भिन्नं वाक्यं जगत्यो भवंतीति। एवं सत्संख्या वि
ष्टुबदरिष्यते। अतः कल्पसूत्रे उक्तं। विश्वजित इत्यत्र मा परिशिष्यति। ततः पंचैतस्यान्ते उक्तमाद्रोहरात्र्यस्माद्। एकस्य

८९ धानाधिकव्यवधानाभावोगात्। इंद्राय सोमं यजता यहर्यत मित्येतेन रूपेणेति। अत्र यजताय यजनीयायेत्यर्थः। यजनीयः सूर्य
इत्येतेन सूर्यरूपेणायुक्ताः। ता एकत्रिंशत्॥ तास्तु जगतीषु दूरोहणं रोहतीति। तास्तु पंचसु जगतीषु दूरोहणं यां सलं रोहति अत्रा
रोहति उपरिभवति। हंसः शुचिषद्वसुरंतरिक्षसदित्यस्यामृचि वक्ष्यमाणांशसनं दूरोहणमुच्यते। अस्या ऋचो लाभः शाखांत
रात्तत्र विभ्रा। श्विनः जागतो वा एष य एष तपति तत्र यः। यजमानो दूरोहणेच्या यजमानस्य स्वर्गे आरोहणं तेनोर्ध्वरोहणं च तथा
दूरोहणेष्वारोहणावरोहणदर्शनाद्यजमानो दूरोहणं। तेन जगतीष्वारोहणप्रकारेणैतमेव सूर्यमेव यजमानो रोह
ति। जगतीषु दूरोहणं रोहतीत्यनयोक्त्यापि ज्ञायते। जगत्यः सर्वास्ततो दूरोहणायतावशिष्टा षष्ठीत्रिष्टुब्भिः। इंद्रः श्रेष्ठानीति
दूरोहणात्पश्चात्। दूरोहणशंसनप्रकारमाह। पच्छः प्रथमं रोहति तदिमं लोकमाप्नोति। अर्द्धर्चशो द्वितीयं तदंतरिक्षलोकमा
प्नोति। त्रिपदस्तृतीयं तदमुं लोकमाप्नोति। केवलीमिति। ततः केवलीमनवानं समग्रां रोहति सर्वावयवाः स्वर्गे स्थितिः। तत्र
स्त्रियच्यो अर्द्धर्चशः पच्छ इति क्रमेणावरोहणरूपं शंसनं तेन प्रकारेणास्मिंलोके प्रतितिष्ठति प्रतिष्ठायामप्रच्युत्यामिति। ते
ष्वा दूरोहणीयाऋक्संशयात्मा समप्रत्रचः संपद्यते सप्तभिः प्रकारैः शंसनात्। ता अष्टाविंशदिति योजना॥ एष प्रसर्वी रहतस्य च राम ८९
क्षि यइति जागतं षष्ठं च भितिहि। तन एष प्रस्वीरवतस्येति सूक्तं शंसति। इंद्रं सिष क्रतुषसंन सूर्य इति सर्प्यवत्तेदनस्या ऋको रूपं॥

ता अनुष्टुप्चत्वारिंशदिति योजना॥ पतंगमक्तमसुरस्यमायये ति तिसृ इति। ततो नंतरं त्च वंस्त क्रमेणैतत्। तां द्योतमानां सूर्यमनीषा
मिति पादे द्योतमानामित्येतेन रूपेणास्मिन्नहेयुक्तमेतत्। ताः सप्तचत्वारिंशदिति योजना॥ उरुं नो लोकमनुनेषि विद्वानि
ति। उरुं नो लोकमनुनेषि विद्वानित्येकपाकं चापरीधानीयया त्रिः शस्तया सह सर्वा भवंति। स्वर्वज्ज्योतिरभयं स्वस्तीत्येतेन रूपेणे
षापरीधानीयास्मिन्नहे युक्ता। ताः पंचाशदिति योजना॥ सर्वा एकपंचाशदिति। निविद्दः सर्वा एकपंचाशत्। यथा त्रिः शस्तया प्र
थमया स्तोत्रियस्तृचइति पंच। अनुरूपेति स्तः। एवं एकपंचाशत्। यथा त्रिः शस्तया प्रथमया स्तोत्रियस्तृच इति पंच। अनुरूपे
ति स्रः। एकाऽपाप्या द्वे प्रगाथे। एको वल्मुखीया। उभयसौन्यनुशंसने त्रैष्टुभं त्रयो दशार्द्धं। यो न्यूकारे त्रैष्टुभं पंचदशं च। इतिर
सर्वेषु पदेषु पंचदशेति सप्तविंशतिः। जागते पंचदशाः सूक्ते महे इति नवेत्येकपंचाशत्सर्वा। तार एकशतमृचो भवंति। तापके
त्रै शतं निष्केवल्ये ऋचः। शतायुर्वै पुरुषः। शतं वर्षाण्यायुरस्येति शतायुः पुरुषः। यद्यपि कृतयुगे त्रेतायुगे द्वापरे चाधिकमा
युः पुरा रोशर्के॥ तथापि ब्राह्मणः शतं वर्षाण्यायुः। कलियुगादिषु यद्यपि वर्षच्छेदबहुलकालत्वमिति वर्षे युतार[illegible]तिमाप्र
तेष्वनशतवर्षत्वं सर्वसंवादित्याच्चेदानीमप्यत्वं शताधिकं संकुचितस्याल्पवृद्धिरगरोपतिस्नायया त्वेवा दिक्षायुहीनि स्कृप
पादितिधर्मशास्त्रेषु॥ अत एव पुरुषो वर्षसमयतारतम्येनशतायुः। शतपर्वाः शरीरे संस्थितानालिपर्वाणि। शतवीर्यः प्रतिष्ठ

९०

र्वीर्य्यमेदाछ्रतेंद्रियः प्रतिवर्षमिंद्रियमाक्रिमेदात्। उपसमीयेयेकशतलमीकृकसपजमानलोकः। व्द्रुलं संज्ञाछंदसो रितिश्रीश्र
उद्दिश्यमानं प्रतिनिर्दिश्यमानयोः पर्य्यायेणलिंगभाजिसर्वनाम नीतिस इतिपुल्लिंगनिर्देशः। तदेत्रेवयजमानान् संस्कुर्वंतिते
नेकशतेनतिष्ठेवत्येनात्रादोयजमानान्संस्कृत्यमहाव्रतीयेनाह्ना प्रजनयति। तत्र हि सहस्रं तिष्ठेवत्यां॥ इति येगी संपत्तावै
ष्टुभानि स्तन्नान्यारभ्ययासंपद्युक्तान्यारभ्यपासंपत्। कोपीतकि कृषेरभि। उक्थ्यमुखीयामभिविधौ कृत्पयपद्युक्तं तत्सर्वं स्तोत्रि
यानुरूपधाम्याप्रगाथ्य योनिद्वयानुशंसनो क्थमुखीयाइतिसमानं। कृतुर्जनित्रीयमुद्धतवृहद्रथंतरइति। योन्यनुशंसनेत्रयःप
दास्तत्रत्वे त्रैष्टुभेषु सूक्तेषु। तदत्रयोन्यनुशंसनपक्षानुसारं त्रैष्टुभमेकमेव सूक्तं परावत्रं योजयति। उद्धतवृहद्रथंतरयोनिपक्षे
कृतुर्जनित्री यं त्रयोदशर्च सूक्तं त्रैष्टुभमवति। तमुष्टुहीति पंचदशर्चं यत्स्वर्वं युक्तं तस्मा निवृत्तिः॥ तस्यैवैकादश स्वयोनाभि
नि। स्वयोनौ वृहत्स्थेतस्यकृतुर्जनित्रीयस्यैकादशर्चो भवंति। रथंतरस्ययोन्यनुशंसनेन त्रयोदशसंनेन त्रयोदशसंपन्नः। स
र्वेषु पक्षेषु पंचदशभ्यो हेम्न्नेतत्पूरणानि विधानेद्वयोर्द्व्याभविष्यति। रूपाभिनत्र दयाएकर्ईयत इति पादे तदपास्तकमी
स्तत्रेकर्ईयतेइत्येतेन स्तर्ष्य रूपेणात द्वतुर्जनित्रीयं सूक्तमस्मिन्यज्ञेयुक्तं॥ एवं द्वयाहि हरिभिरिति पंचदशेति। एंद्रयासीतिपंच
दशर्चमानुष्टुभं भवतिजागतमभित्यं मेषं पुरुहूतमग्मियमिति पंचदशर्चं निवर्तते। सरूपेरास्तुतोगहीति पादे प्रतिदिनं रा.म. ९०

सम्मोनेरूपेणगहीत्येतेन स्तर्ष्य रूपेणास्मिन्यज्ञेसूक्तमेतत्प्रयुक्तं॥ वरोरेकादशशस्त्राणि विदमिति। व्द्रुरीतिबहृदवंप्रतेमहेवि
दथेशंसिषं हरीइतिसूक्तं पूर्वं ये गयां संपत्तौ तस्यनवशस्तत्यक्ता। इह तु त्रैष्टुभेन्मूनपोर्द्वयोर्ईरणपाह। वरोःसूक्तसेकाद
शशस्त्राणिविदं शंसति। मध्य एकशतं स्येकपंचाशत्तं शस्त्रेति। एकशतस्यमध्ये एकपंचाशतं शस्त्रेति पूर्वोक्तोपसंहारः
द्वादशयोनिशंसनात्पूर्वा स्वयोदश सहर्योनिपक्षेकृतुर्जनित्री यस्य पंचदशानुष्टुभस्यैकादश वरोरित्येकपंचाश
त्वद्विवरोरभ्युदेति। प्रतेमहइत्यस्य वरोर्द्वरूपावभ्युदेति प्राप्नोति होता। सर्वहरेर्वेति। प्रकृतिरेवकृष्ये विकल्पमाह। इ
दं सूक्तं वरोर्वा सर्वहरेर्वेति वरोरितिसर्वहरेरिति वानिर्दिश्यत इत्यर्थः। कृषिदेवता बंदासि प्रायेणप्रकृतिमूलानि। एवं स
र्वहरेर्वेत्यनेन सूक्तांतरेन प्रत्येतव्यं। यतेस सोता वरुः सर्वहरिर्वेत्यनुक्रमणयामूलमिदं। स्रासत्या यातुमघवंकृजीषी
त्येकविंशतिमहिस्त्रोतिरित्यादियैंम्यमतेन समानं। पंचजगत्युः पूर्वास्तत्तो दूरोहणीयास्तस्तोतांत्यात्रिष्टुविति पूर्वएवप्र
कारः। तृ एकपानविंशादितियोजना। एकयोनपात्रिंशत्र। एकोद्वेद्वेत्रिंशास्यादिसर्प्यः॥ दूरोहणीयाः सप्तेति। येंम्यम
तेन समानं। यद्धःप्रथमंरोहणीत्यादिपूर्वव्याख्यातं। तताःषद्विंशादितियोजना॥ अन्नभूरेकोरपिपनेष्वीणामिति। दूरोह
णीयानंतरं त्रैष्टुभं पंचर्चमभूरेकइति भवन्ति कौषीतकं यत्पंचर्दिविशांपायो। एवं प्रपन्नर्वीरितिषत्तृचं तिवर्त्तते॥

९१ दशाप्रपित्वे अथ सूर्यस्येति सूर्यवत्त्वेदेतस्याक्षोरूपं ॥ ता एकचत्वारिंशदितियोजना ॥ त्यमू षु वाजिनं देवजूतमिति तिस्र
इति । अयमपि विशेषः कौषीतकं संपदि । त्यमू षु वाजिनं इति तिस्रो भवंति । अस्यां संपदि पूर्वे तिस्रोऽन्त्या आपन्नाः । वि
विदो मंतरेद्ध । एष प्रपद्वीरिति षसां स्थाने भूरेक इति पंचेत्येकान्त्ना । एताभिस्तिस्तृभिः प्ररणं कियते सूर्य्य इव ज्योति
पापस्तता नेत्येतेन सूर्य्यरूपेणास्मिन्न्युंजे युक्तं । तासु षतुश्चत्वारिंशदितियोजना ॥ पतंगमक्तस्य इति । पतंगमक्तमिति ति
स्र इति पैंग्यमते नसमानं । ताः सप्तचत्वारिंशदितियोजना ॥ उरुं नो लोकमनु नेषीति । पैंग्यमले नसमानं । अत्र न यापरि
धानीयया त्रिंशत्त्र्यासह । ताः पंचाशदितियोजना । पूर्वा एकपंचाशदिति पूर्वेद्दर्शिताः । ता एकशतमचावभवंतीतियोज
ना । ता सांशतम्भरवयावतीनां ब्राह्मणां पूर्वमुक्तं । शतायुर्वै पुरुषइत्यादिना ॥ ८ ॥ तत्सवितुर्वरेणीमहे घृतान्नो देववसवितरि
ति । प्रकृतावग्निष्टोमे नित्यपाससानित्यौ घृतौ । स्तानि त्या प्रतिपतत्सवितुर्वरेणीमह इत्येषा । अस्मिन्यज्ञे वैश्वदेवस्य प्रतिपत् ।
अनुचरस्तु पो नित्यो घृतानो देवसवितरिति सोऽस्मिन्यज्ञे वैश्वदेवस्यानुचरः । चकारद्वयमन्योन्यसमुच्चयार्थं प्रयुज्यतेऽत्र स
र्वत्र । तयोः प्रतिपदनुचरयोरुक्तं ब्राह्मणं सवितृत्वाद्वैश्वदेवे प्रतिपद्घृतइत्यादि । युंजते मन उत युंजते धिय इति । एतत्सूत्र राम.
क्तं सावित्रं वैश्वदेवशस्त्रे । उत सूर्यस्य रश्मिभिः समुच्यसीति पादे सूर्यवत्त्वे देतस्याक्षोरूपं । ते हि द्यावापृथिवी विश्वशंभुवे ९१

ति । एतत्सूक्तं द्यावापृथिवीयं । देवो देवी धर्मणा सूर्यः शुचिरिति सूर्यवदेतदस्याक्षोरूपं ॥ किमु श्रेष्ठः किं यविष्ठो न आज
गन्निति । एतत्सूक्तमार्भवं । यदावाख्यद्वमसो चतुरः कृताविति पादेऽवाख्यदिति प्रकाशकत्वं प्रयुज्यत इत्येतेन सूर्यरू
पेणास्मिन्यज्ञे युक्तं ॥ देवान्हुवे बृहच्छ्रवसः स्वस्तय इति । एतत्सूक्तं वैश्वदेवं । ये सूर्यस्य ज्योतिषो भागमानशुरिति पादे सू
र्यशब्दोस्तीति सूर्यवत्त्वं । ज्योतिःशब्दोस्तीति [stained] ज्योतिष्मतीत्येतदस्याक्षोरूपं ॥ वैश्वानराय धिषणामृतावृध इति ।
एतत्सूक्तं वैश्वानरीयं । ऋतरुचानं भानुना ज्योतिषा महां इति पादे रुचितार्थशब्दवद्रुचितत्वाज्ज्ञानुशब्दवज्ज्योतिशब्दवत्तात
देतस्याक्षोरूपं ॥ प्रयज्यवो मरुतो भ्राजदृष्टय इति । एतत्सूक्तं मारुतं विरोकिणः सूर्यस्येव रश्मय इति पादे सूर्यशब्दवद्रश्म
य इत्यस्या ज्योतिष्मत्त्वदेतस्याक्षोरूपं ॥ वेदिषदे प्रियधामाय सुद्युत इति । एतत्सूक्तं जातवेदसीयं ॥ ज्योती रथं शुक्रवर्णं तमो
हनमित्येतेन ज्योतिःशब्दात्सूर्यरूपेणास्मिन्यज्ञे युक्तं ॥ इत्यसाग्निमारुतेस्तक्रानीति पूर्वोक्तोपसंहारः इत्येतत्स्यात्फाससूक्तानी
ति सर्वोपसंहारः । तत्र स्मादग्निष्टोमः संतिष्ठत इति प्रोक्तोपसंहारद्वयस्य प्रयोजनं । तेन द्विपुचांसद्वत्सरस्यांते वर्तीयस्य
चेकाहो भवतिमहाकौषीतकीयब्राह्मणे दर्शनानन्तराग्निष्टोमसंस्थ एव । अस्यार्थवादः । ज्योतिर्वा अग्निष्टोमः सर्वसोमप
तानां दीप्तिहेतुत्वात् । ज्योतिरेवायमेव तपति सूर्य्यो ज्योतिषैव संरव्ययाज्योतिरस्तत्र लयं यज्ञे समर्द्धयति । तेन्द्रतस्य मातुर्वंति

९२ येषु वतमहरूप्यंति॥ विषुवानेवस्तोत्रीयो विहिते नाराशंसे ब्रुवतः। रात्रिसत्रस्य वा विषुवानतिरात्र एव स्यादिति वक्ष्यते॥ ॥ अथ ध्याया
यी॥ पुरादित्यस्यास्तमयादिति। एतदहः पूर्वं होतृशस्त्रे निरूपितं। इतः परं साधारणानुगुणविधीनाह। आदित्यस्यास्तमयात्
पुरैतदहः पूर्वं होतृशस्त्रे निरूपितं। इतः परं साधारणानुगुणविधीनाह आदित्यस्यास्तमयसंस्थापयेयुः। द्विर्वचनमकरणे
छंदसि वेति वक्तव्यमिति सनिद्विर्वचनाभावः। स्तामपि सन्दस्यन्ते। संस्थापयेयुः इत्यर्थः। यथा जिघांसंतं जिघांसीयादि
त्यत्र घ्नंतं हन्यादित्येवार्थः॥ सप्रातरनुवाकमिति। आघावधिरयं। एतदहः सप्रातरनुवाकं दिवाकीर्त्यं दिने एव कीर्त्यं। प्रात
रनुवाको स्याद्ध्रुउदिते आदित्ये पठनीयः। उभयोरवध्योरर्थिकापकीपरीभाव इत्याह। सप्रातरनुवाकेन सपत्नीसंयाजांत
द्विवेव कीर्त्यमिति। नेनेवाह्ना पुरादित्यस्यास्तमयं अग्नीध्रे पुरिति। पत्नीसंयाजोत्तराणाय वर्ण्येयेस्यादीनि यज्ञशेषत्वादस्त
मयादूपर्य्यपि भवंतु तत्रो नावध्यति क्रमः। सोमयागात्मकं प्रातरनुवाकप्रभृत्याग्निमारुतपत्नीसंयाजांतं तद्दिवैव की
र्त्यमित्येतावत्यवधिनियममम्॥ अग्निं मन्ये पितरमग्निमापिमिति। अनुगाविशेषमाह। तदहस्तस्मिन्नह्नि प्रातरनुवाकम
ग्निं मन्ये पितरमग्निमापिमग्निं भ्रातरमित्येतया ऋचा प्रतिपद्यते आरभते। आपिमिति पदं यदस्ति तेनापोरेवत्या आपो रेव राम.
तीः क्षयथा हि वस्व इत्यस्या रूपं। आप्रोतेर्धातोरुभयत्र समानत्वात्। तेन रूपेणोपायप्रतिपद्युक्ता। हि विमुक्तं यजतं सूर्य्यस्य ९२

तिपादे सूर्यवतीतदे तस्याह्नो रूपं॥ तदुहेत्यक्य पांपक्षांतरे। कोषीतकिराहस्म वै निश्चिते प्रातरनुवाकः प्रजापतिरन्तोनैत
प्रातरनुवाकोपाकरसांराज्ञा वपिकृतं तमसेधकाराय किंतस्य हजोन्वलभेवा। स्वाभिमतमाह। पथ्यायथ्यंपयास्वका
लमेवतं प्रातरनुवाकमुपाकुर्य्यादिति। तद्यथा स्त्रकरणं तस्य प्रातरनुवाकस्य समृद्धं रूपं। समृद्धतरमाह। तथ्या प
पायथ्यंपयास्वकमेण प्रातरनुवाको तरमुपांसंतर्पीमोह्येते तद्वत्यै तत्पांसंतर्य्यामयोः समृद्धं रूपं॥ वासिष्ठमाप्री
स्त्रकमिति। विषुवत्यस्मिन्यज्ञे पशुयागप्रयाजेषु वासिष्ठं शुपत्ननः समिद्धमग्नेरथेत्येतदाप्रीसूक्तं॥ द्वितीयः प्रयाज
स्ततन्नपात्ते तथास्मिन्यज्ञे तनूनपादेवकर्तव्यो वचनात्। संरश्मिभिस्ततनः सूर्यस्येति सूर्यवत्त्वदेतस्याह्नो रूपं॥ अनु
ष्टुप्तस्याह्न इति। एतस्याह्नो होतानुष्टुवर्सीयपिंगाक्षस्यात्तदेतत् काचित्कप्रसिद्धो इत्येक आहुः। अस्या पर्वादः। एतेका
ह्नामुं सूर्य्यमीप्सति प्राप्नुमिच्छंति योसौ तपति। तथा पाहहरन्कार्य्यार्थ्या अत्र यां संकार्य्यसाधकमुपेपादेवं तत्सूर्य्यवरीहो
तारमुपेयादिति। सिद्धांतमाहपयोपयाश्मितित्वेवस्थितमिति। उपपादं प्राप्तिमनतिक्रम्यपयोपपादं। यद्योपपद्येते तथे
व होतास्यादिति स्थितं॥ शस्त्रे सौदेतस्याह्नो रूपमुपेसे ह्नो ज्ञान्हो रूपं नोपेपैतेत्। अस्याह्न अग्निष्टोमसंस्थस्य लघुत्वाछंत
दशाशतेविशतिशतं वा प्रातरनुवाकमनुब्रूयादिति साराकांतरं॥ सौर्य्यः पशुरुपालंभ्यः सवनीयस्येति। सवनीयः पशुरग्ने

९३ यत्तस्य समीपे स्थितः सूर्यदेवत्यः पशुरुपालंभ्यः ॥ स उपांशु भवतीति ॥ स सौर्य उपांशु भवति । स होता पत्तपशुं निर्दिष्टपादुर्ह्नेष्ट्र
यान्तं होता रंविपरीतकारिणो यो न्यः कश्चित्तत्र ब्रूयात् । दुश्चर्मा कुष्ठी किलासं वै जन्मनि भवानासीदिदानीमपि दुश्चर्मा भवि
ष्यसीति । नैनत्तं प्रत्यक्षं तथ्या सर्वप्रसिद्धं स्यात् । तस्मादुपांशु कर्तव्यः । ते वा एते चत्वार इति । प्रासंगिकं पशुमुद्दिश्य पशुर्व्यति ।
ते वा एव पशव उपांशु भवंति । सोमसावित्रे प्राजापत्यो वामदेव्य इति । अथ यान्येतिरुक्तानि । अथ यत्रोक्तस्वरसामान इति । विषु
वंतं होतृशस्त्रादिभिर्निरूप्याधुनानुक्रमगुणविशिष्टान्स्वरसाम्नो विधत्ते । एषां स्वरसाम्नां नाम प्राप्य स्वरसामेति कर्तव्य
तां संपत्तिः । अथ विषुवदनंतरं त्रीन्स्वरसाम्न आहुरित्यापयनंतरीयः स्वरसाम्ना तेऽदितीयसत्तमप्रायइत्येवमनुष्ठानो
नुपयंति । तेषां स्वरसाम्नामनुक्रं ब्राह्मणांतरस्तादासीदत एतमेव ग्रहमुपरिष्टादिषुवत उपायन्निति । अथवा कर्मांतरत्रि
विधिः स एवेह त्वनुक्रमगुणमात्रं विधीयते ॥१०॥ त्रयोदशं वा एते मासमापुर्वंति यद्विश्वजितमुपयंतीति । विश्वशब्दः
कार्त्स्न्यवचन इति संवत्सरजयः कार्त्स्न्येन यस्मात्सागान्नवंतीति विश्वजित् द्वादशैर्मासैर्बृहद्गानिनाप्याद उपरस्तरं विश्वजितं
विधत्ते । वैनिश्चितं त्रयोदशमेनं मासमापुर्वंति । संवत्सरसत्रफलं द्वादशमासोपयोग्यं भवेत् । तथा च युगकल्पादिका रामः
लोपभोग्यफलभोगसमयमध्ये त्रयोदशमासामलमासारव्यावृहवर्तेषु संवत्सरसत्रफलोपभोगो न भवेदिति शंकाविर ९३

स्यत इति स्मृतिः । यदि त्वनादिप्रसिद्धयथ मध्यमं विश्वजितमुपयंति । इति विधिः । वैनिश्चितमेतावान्संवत्सरो द्वादशमा
सस्यतः कदाचित्त्रयोदशमासः संपद्यत इति तदैवैतत्त्रयोदशमास एव सर्वः संवत्सर आप्तो भवति ॥ तमाहुरेकाहम
मलह इति । तं विश्वजितमेकाहं सम्मलह इत्याहुः । यद्विनिश्चितं पलं दिनं वं संक्रिय तेनैतत्यस्यैकैकपनेनाद्विश्वजितैकाहेन सि
त्वक्रिक्रियत इति । एवं प्रस्तावं कृत्वा गुणविधिमाह । तदेवनिश्चितमिदं बहु महद्विश्वरूपं विश्वजिति क्रियते पत्सर्वाणि पृ
ष्ठानि सर्वे स्तोमा उच्चावचानुवचक्रमशः समवधीयेत इति । सर्वाणि पृष्ठानीत्यादिगुणविधिवाक्यं । वैराजमेवास्य प्र
स्तुतं पृष्ठं भवतीति । सर्वाणि पृष्ठानीत्यत्र सर्वशब्देनवाइकोव्यं तेनमत्तादिवाकीर्तादीनि । एतत्तापयितुं स्वसंसिद्धिशेषवि
नियोगं दर्शयति । अस्य यज्ञस्य वैराजं प्रस्तुतं पृष्ठं भवति । मध्यंदिनेसवने पृष्ठस्तोत्रे वैराजं पिबासोममिंद्र मंदतुत्वेति च
तुर्थे पृष्ठ्यस्य षडहस्याह्नि यथोक्तं तत्र स्तुतं होतुः पृष्ठं भवति । प्रत्यह्नि मित्थंतां होतुः पृष्ठं मुख्यं पृष्ठं परे पुष्टपृष्ठशब्दो
गौणे गलिंगसमानयायन्यायादिति ज्ञाप्यते । शस्त्रमपि यथोक्तमेव स्तदिते भवतीति संनिहितमेव च सति । माध्यंदिनेपव
माने रथंतरमिति । माध्यंदिनेपवमाने रथंतरं पृष्ठं साममणां भवति । अन्यत्र पृष्ठत्वेनदृष्टत्वात्तेरां पृष्ठत्वं । अनेनपत्ते
